("गव्यन्त्रिदोषशमनं तक्रं श्रेष्ठन्तदुच्यते ।
दीपनं रुचिकृद्बल्यमर्शोदरविकारजित् ॥"
इति गव्यतक्रगुणाः ॥
"माहिषं कफकृत् किञ्चिद्‌द्रवनं शोफकरं नृणाम् ।
प्लीहार्शोग्रहणीगुल्मपाण्ड्वामयविनाशनम् ॥"
इति माहिषतक्रगुणाः ॥
"छागलं लघु संस्निग्धं त्रिदोषशमनं परम् ।
गुल्मार्शोग्रहणीशूलं पाण्ड्वामयविनाशनम् ॥"
इति छागीतक्रगुणाः ॥
"तथाच त्रिविधं तक्रं कथ्यते श्रृणु पुत्रक ! ।
यथायोगेन तत् सम्यक् शस्यते येषु रोगिषु ॥
समुद्धृतघृतं तक्रमर्द्धोद्धृतघृतञ्च तत् ।
अनुद्धृतघृतञ्चान्यदित्येतत्त्रिविधं मतम् ॥
सर्व्वं लघु च पथ्यञ्च त्रिदोषशमनं परम् ।
ततः परं पथ्यतमं क्रमेण समुदीरितम् ।
समुद्धृतघृतन्तक्रं लघु पथ्यतमं मतम् ॥
गरोदरार्शोग्रहणीपाण्डुरोगज्वरातुरे ।
वर्कोंल्मग्रहे वापि प्लीहायापदमेहिषु ॥
हितं संप्रीणनं बल्यं पित्तरक्तविरोधकृत् ॥
अर्द्धोद्धृतघृतं तस्माद्‌घृष्यं गुरु कफप्रदम् ।
मधुरं पित्तरक्तघ्नं श्रमघ्नं परमं मतम् ॥
अनुद्धृतघृतं सान्द्रं गुरु विद्यात् कफावहम् ।
बलप्रदन्तु क्षीणानामामशोफातिसारकृत् ॥"
इति त्रिविधतक्रगुणाः ॥*॥
"तक्रं ग्राहि कषायाम्लं वीर्य्योष्णं दीपनं लघु ।
श्रमापहरणं स्निग्धं ग्रहण्यर्शोऽतिसारनुत् ॥
इति तक्रगुणाः प्रोक्ता न दद्यात् यत्र तच्छृणु ।
वाते शोषे च क्षीणानां नोष्णकाले क्षतस्तु च ॥
संमूर्च्छाभ्रमदाहासु तथाच रक्तपित्तके ।
न शस्तं तक्रपानञ्च करोति विविधान् गदान् ॥"
एतेषां तक्रं निषिद्धम् ॥
इति हारीते प्रथमस्थानेऽष्टमेऽध्याये ॥*॥)

तक्रकूर्चिका, स्त्री, (तक्रजाता कूर्चिका ।) तक्र-योगेन जातदुग्धात् जाता । छाना इति भाषा । अस्या गुणाः । मलवद्धवातकारित्वम् । रूक्ष-त्वम् । दुर्ज्जरत्वञ्च । इति राजवल्लभः ॥ (यथा सुश्रुते सूत्रस्थाने ४५ अध्याये ।
"ग्राहिणी वातला रूक्षा दुर्ज्जरा तक्रकूर्चिका॥")

तक्रमांसं, क्ली, (तक्रयोगेन पाचितं मांसम् ।) व्यञ्जनविशेषः । एखनि इति पारस्य भाषा । तस्य पाकप्रकारो यथा,—
"पाकपात्रे घृतं दत्त्वा हरिद्राहिङ्गु भर्ज्जयेत् ।
छागादेः सकलस्यापि खण्डान्यत्रौ च भर्जयेत् ॥
शिद्धियोग्यं जलं दत्त्वा पचेन्मृदुतरं यथा ।
राजिकादियुतं तक्रं मांसखण्डानि धारयेत् ॥"
तस्य गुणाः ।
"तक्रमांसन्तु वातघ्नं लघु रुच्यं बलप्रदम् ।
कफघ्नं पित्तलं किञ्चित् सर्व्वाहारस्य पाचनम्॥"
इति भावप्रकाशः ।

तक्राटः, पुं, (तक्राय तक्रोत्पादनाय अटतीति । अट + अच् ।) मन्थानदण्डः । इति हारा-वली । ६४ ॥

तक्ष, त्वचो याष्टे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) त्वचो याष्टस्तनूकरणमनयोग्र्यहणम् । तक्ष त्वचने इति प्राञ्चः । त्वचनं संवरणमिति रमानाथः । तक्षति कायं वर्म्मणा भटः । इति दुर्गादासः ॥

तक्ष, ऊ कार्श्ये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-वेट् ।) ऊ, तक्षिष्यति तक्ष्यति । कार्श्यं कृशकरणम् । तक्षति काष्ठं तक्षा । इति दुर्गादासः ॥

तक्ष, ऊ न तक्षे । इति कविकल्पद्रुमः ॥ (स्वां-परं-सकं-वेट् ।) तक्षः कृशकरणम् । ऊ, तक्षि-ष्यति तक्ष्यति । न, तक्ष्णोति काष्ठं तक्षा । इति दुर्गादासः ॥

तक्षकः, पुं, (तक्षतीति । तक्ष + ण्वुल् ।) पातालस्थाष्टनागान्तर्गतनागविशेषः । स कश्य-पात् कद्रुगर्भे जातः इन्द्रसखः । अस्य वासः खाण्डवने आसीत् । अयं परीक्षितं दष्टवान् । इति श्रीभागवतम् ॥ (अयं हि क्षपणकरूपधारी उतङ्कस्य मुनेर्गुरुदक्षिणार्थमानीते कुण्डले अपहृत्य नागलोकं गतवान् । यथा, महा-भारते । १ । ३ । १२७ ।
"तस्य तक्षको दृढमासन्नः स तं जग्राह । गृहीत-मात्रः स तद्रूपं विहाय तक्षकस्वरूपं कृत्वा सहसा धरण्यां विवृतं महाविलं प्रविवेश ॥ तक्ष तनूकरणे+"कृन् शिल्पिसंज्ञयोः ।"उणां । २ । ३२ । इति कुन् ।) त्वष्टा । इत्यमरः । ३ । ३ । ४ ॥ विश्वकर्म्मा । इति शब्दरत्नावली ॥ द्रुमभेदः । इति हेमचन्द्रः ॥ सूत्रधारः । इत्य-मरटीकासारसुन्दरी ॥ (स्वनामख्यातः प्रसेन-जित्-पुत्रः । यथा, भागवते । ९ । १२ । ८ ।
"ततः प्रसेनजित् तस्मात् तक्षको भविता पुनः ॥"
छेदके, त्रि । यथा, रामायणे । २।८०।२ ।
"तथा वर्द्धकयश्चैव मार्गिणो वृक्षतक्षकाः ॥")

तक्षणं, क्ली, (तक्ष तनूकरणे + भावे ल्युट् ।) कृशकरणम् । (यथा, मनुः । ५ । ११५ ।
"द्रवाणाञ्चैव सर्व्वेषां शुद्धिरुत्प्लवनं स्मृतम् ।
प्रोक्षणं संहतानाञ्च दारवाणाञ्च तक्षणम् ॥")

तक्षणी, स्त्री, (तक्ष्यतेऽनेनेति । तक्ष + करणे ल्युट् । टित्त्वात् ङीप् ।) वासी अस्त्रम् । इति शब्द-रत्नावली ॥

तक्षशिला, स्त्री, देशविशेषः । इति सिद्धान्त-कौमुदी ॥ (यथा, महाभारते । १।३।२२ ।
"तेनैवमुक्ता भ्रातरस्तस्य तथा चक्रुः स तथा भ्रातॄन् सन्दिश्य तक्षशिलां प्रत्यभिप्रतस्थे ॥")

तक्षा, [न्] पुं, (तक्षति तनूकरोतीति । तक्ष + "कनिन् युवृषितक्षिराजीति ।" उणां १।१५६। इति कनिन् ।) त्वष्टा । इत्यमरः । २।१०।९॥ (यथा, माघे । १२ । २५ ।
"सन्नाङ्गसन्धौ विगताक्षपाटवे
रुजा निकामं विकलीकृते रथे ।
"आप्तेन तक्ष्णा भिषजेव तत्क्षणं
प्रचक्रमे लङ्घनपूर्व्वकः क्रमः ॥")

तग, इ स्खलने । कम्पे । गतौ । इति कविकल्प-द्रुमः ॥ (भ्वां-परं-अकं-गतौ तु सकं-सेट् ।) इ, कम्पेऽपि तङ्ग्यते । इति दुर्गादासः ॥

तगरं, नदीष्टम् । पिण्डतगर इति कोङ्कणे प्रसिद्धः । तगरमूल इति ख्यातश्च । तत्-पर्य्यायः । कालानुसारिवा २ चक्रम् ३ कुटिल-लम् ४ शठम् ५ महोरगम् ६ नतम् ७ विनम्रम् ८ दीपनम् ९ तगरपादिकम् १० । इति रत्न-माला ॥ विनम्रम् ११ कुञ्चितम् १२ वक्रम् १३ नहुषाख्यम् १४ दण्डहस्तम् १५ वर्हणम् १६ पिण्डीतगरकम् १७ पार्थिवम् १८ राजहर्ष-णम् १९ कालानुसारकम् २० क्षत्रम् २१ दीनम् २२ । अस्य गुणाः । शीतलत्वम् । तिक्त-त्वम् । दृष्टिदोषविषापस्मृतीभूताद्भयनाशित्वम् । पथ्यत्वञ्च ॥ आङ्गुल्यश्च । इति राजनिर्घण्टः॥ गन्धद्रव्यविशेषः । तस्य पर्य्यायगुणाः ।
"कालानुसार्य्यं तगरं कठिनं लघु संनतम् ।
अपरं पिण्डतगरं दण्डहस्ति च वर्हणम् ॥
तगरद्वयमुष्णं स्यात् स्वादु स्निग्धं लघु स्मृतम् ।
विषापस्मारशूलाक्षिरोगदोषत्रयापहम् ॥"
इति भावप्रकाशः ॥

तगरः, पुं, (तं क्रोड़भागं गिरतीति । गॄ + अच् ।) पुष्पवृक्षविशेषः । टगर इति भाषा । तत्-पर्य्यायः । सितपुष्पः २ । कालपर्णः ३ कटु-च्छदः ४ । इति शब्दरत्नावली ॥ (यथा, महा-भारते । १३ । १०४ । ८५ ।
"प्रियङ्गुचन्दनाभ्याञ्च बिल्वेन तगरेण च ।
पृथगेवानुलिम्पेत केशरेण च बुद्धिमान् ॥")
मदनवृक्षः । इति राजनिर्घण्टः ॥

तगरपादिकं, क्ली, (तगरस्य पादौ मूलदेश इव विद्यतेऽत्र इति ठन् ।) तगरम् । इति रत्न-माला ॥

तङ्कः, पुं क्ली, (टङ्क+पृषोदरात् साधुः ।) पाषाण-दारणः । इत्यमरटीकायां रमानाथः ॥ (तकि कृच्छ्रजीवने + भावे घञ् ।) प्रियविरहज-सन्तापः । भयम् । इति लिङ्गादिसंग्रहटीकायां भरतः ॥

तञ्ची, स्त्री, (तं पुच्छाकारं जवति गच्छतीति । जु + क्विप् ङीप् ।) हिङ्गुपत्री । इति राज-निर्घण्टः ॥

तट, उच्छ्राये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) उच्छ्राय उच्चीभावः । तटति पुलिनम् । इति दुर्गादासः ॥

तट, क आघाते । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क, ताटयति । इति दुर्गा-दासः ॥

तटं, क्ली, (तटति उच्छ्रितं भवतीति । तट उच्छ्राये + पचाद्यच् ।) क्षेत्रम् । इति मेदिनी । टे, १६ ॥ (प्रदेशः । यथा, महाभारते । १ । ३६ । ३ ।
"गोकर्णे पुष्करारण्ये तथा हिमवतस्तटे ॥")

तटः, त्रि, (तटति उच्छ्रितो भवतीति तट + अच् ।) तीरम् । इत्यमरः । १ । १० । ७ ॥